व्यतीपाते दिनक्षये । शुक्लपक्षे तृतीयायामुपरागे शशिक्षये । विवाहोत्सवयज्ञेषु द्वादश्यामथ वा पुनः । शुक्लायां पञ्चदश्यां वा पुण्यर्क्षे वा विधानतः । धान्यशैलादयोऽपि देयाः शास्त्रं विजानता” इत्युपक्रमे ।
“अतःपरं प्रवक्ष्यामि तिलशैलं विधानतः । यत्प्रदानान्नरोयाति विष्णुलोकं सनातनम् । उत्तमो दशभिर्द्रोणैर्मध्यमः पञ्चभिः स्मृतः । त्रिभिः कनिष्ठो विप्रेन्द्र ! तिलशैलः प्रकीर्त्तितः । पूर्ववच्चापरान् सर्वान् विष्कम्भानमितोगिरीन् । दानमन्त्रान् प्रवक्ष्यामि यथावन्मुनिपुङ्गव ! । यस्मात् मधुवधे विष्णोर्देहस्वेदसमुद्भवाः । तिलाः कुशाश्च माषाश्च तस्माच्छन्नो भवत्विह । हव्ये कव्ये च यस्माच्च तिला एवाभिरक्षणम् । भवादुद्धर शैलेन्द्र ! तिलाचल ! नमोऽस्तु ते” । इत्यामन्त्र्य च यो दद्यात् तिलाचलमनुत्तमम् । स वैष्णवं पदं याति पुनरावृत्तिदुर्लभम् । दीर्घायुष्यं समाप्नोति पुत्रपौत्रैश्च मोदते । पितृभिर्देवगन्धर्वैः पूज्यमानो दिवं व्रजेत्” मत्स्यपु० ८६अ० । विष्कम्भरूपतिलाचलस्तु यथा ।“पश्चात्तिलाचलमनेकसुगन्धिपुष्पसौवर्णपिप्पलहिरण्मयहंसयुक्तम् । आकारयेद्रजतपुष्पवनेन तद्वद्वस्त्रान्वितं दशिशिसितोदसरस्तथाग्रे” मत्स्यपु० ८२ अ० ।

**तिलस्नेह** पु० ६त० । तैले शब्दार्थक० । [राजनि० ।

**तिलाङ्कितदल** पु० तिलेनाङ्कितं दलमस्य । तैलकन्दे

**तिलान्न** न०तिलमिश्रितमन्नं शा०त० । तिलमिश्रितेऽन्ने कृशरे हेम० । [जीरके शब्दार्थचि० ।

**तिलापत्या** स्त्री तिलस्येव क्षुद्रः अपत्यं वीजमस्याः । कृष्ण-

**तिलित्स** पु० तेलनं तिल्विर्गतिस्तं त्सरति छद्मना गच्छति त्सर–ड । अजगरे सर्पभेदे अमरः स्त्रियां जातित्वात् ङीष्

**तिलोत्तमा** स्त्री अप्सरोभेदे “तिलोत्तमा नाम पुरा ब्रह्मणो योषिदुत्तमा । तिलं तिलं समुद्धृत्य रत्नानां निर्मिता शुभा”भा०अनु० १४१अ० । तस्यास्तथानामकरणं यथा “तिलं तिलं समानीय रत्नानां यद्विनिर्मिता । तिलोत्तमेति तत्तस्या नाम चक्रे पितामहः” भा० आ० २११ अ० ।

**तिलोदक** न० तिलमिश्रितमुदकम् शा० त० । तिलमिश्रिते उदके “तेषां दत्त्वा तु हस्तेषु सपवित्रं तिलोदकम्” मनुः “बलिं भिक्षां तथाऽर्घ्यञ्च पितॄणाञ्च तिलोदकम्” भा० अनु० १२६ अ० । “आवाहयिष्ये तान् सर्वान् दर्भपृष्ठे तिलोदकैः” वायुपु० ।

**तिलौदन** पुंन० तिलमिश्रितः ओदनः । कृशरे हारा० ।

“दुहिता मे पण्डिता जायेत सर्वमायुरियादिति तिलौदनं पाचयित्वा” शत०ब्रा० १४।८।४।१६ । “तिलमिश्रमोदनं कृशरमित्यर्थः” भा० ।

**तिल्पिञ्ज** पु० तिल+पिञ्ज–बेदे डिच्च । बन्ध्यतिले “इषीकां जरतीमिष्ट्वा तिल्पिञ्जं दण्डनं नडम्” अथ० १२।२।५४।

**तिल्य** न०तिलानां भवनं क्षेत्रम् यत् ।१तिलभवनयोग्ये क्षेत्रे तिलाय हितं यत् । २तिलहिते त्रि० ।

**तिल्ल** गतौ भ्वा०पर०सक०सेट् । तिल्लति अतिल्लीत् । तितिल्ल ।

**तिल्व** पु० तिल–व्न्हे “उल्वादयश्चेति” उणा० नि० । १लोध्रे अमरः २श्वेतलोध्रे सुभूतिः ३रक्तलोध्रे चीरस्वामी स्वार्थे क । तत्रार्थे राजनि० । “न्यग्रोधाश्वत्थतिल्वकहरिद्रुस्फूर्जविभीतकपापनामभ्यश्च” कात्या०श्रौ०२१।३।२० “तिल्वकः तिरिशः” कर्कः ।

**तिल्विल** त्रि०तिल–ल्व न्हे वा०कु तिलुः स्निग्धा इलाभूमिर्यस्मिन् । देवयजने स्थाने “भद्रे क्षेत्रे निमिता तिल्विले वा”ऋ०५। ६२।७ “इहैव तिष्ठ निमिता तिल्विलास्तामिरावतीं मध्ये पोषस्य तिष्ठन्तीम्” आ० ग्ट० २।८।८ । “तिल्विलायध्वमुषसो विभातीर्यूयं पात स्वस्तिभिः सदा नः” ऋ० ७।७८।५।“तिल्विलायध्वं तिलुरिला भूमिर्यस्य तत् कुरुत” भा० ।

**तिष्ठद्गु** अव्य०तिष्ठन्त्यो गावो यस्मिन् काले तिष्ठद्गुप्रभृतित्वात् नि० अव्ययीभावः । दोहनकाले “आ तिष्ठद्गु जपन् सन्ध्यां प्रक्रान्तामायतीगवम्” भट्टिः ।

**तिष्ठद्गुप्रभृति** न० अव्ययीभावे निपातनार्थशब्दसमूहे स च गणः पा० गणसू० उक्तो यथा
“तिष्ठद्गु वहद्गु आयतीगवम् खलेयवम् खलेबुसम् लूनयवम् लूयमानयवम् पूतयवम् पूयमानयवम् संहृतयवम् संह्रियमाणयवम् । संहृतबुसम् संह्रियमाणबुसम् समभूमि समपदाति सुषमम् विषमम् । दुःषमम् निषमम् अपसमम् आयतीसमम् प्रौढम् पापसमम् पुण्यसमम् प्राह्णम् प्ररथम् प्रमृगम् प्रदक्षिणम् अपरदक्षिणम् सम्प्रति असम्प्रति इच्प्रत्ययः समासान्तः” ।

**तिष्ठद्धोम** स्त्री तिष्ठता होमो यत्र । यजतिरूपे यागभेदे “यजतिजुहोतीनां को विशेषः” कात्या०श्रौ० १।२।५ “यजतीनां यागानां जुहोतीनां होमानां च परस्परं को विशेषः को भेद इति प्रश्नः । तत्र यजतीनां विशेषमाह” कर्कः “तिष्ठद्धोमा वषट्कारप्रदाना याज्यापुरोऽनुवाक्यावन्तो यजतयः”६। उच्यन्त इति शेषः ।“तिष्ठता